# Shivastutishlokasamnayanam 7

# શિવસ્તુતિશ્લોકસંનયનમ્ ૭

## Document Information

Text title : Shivastutishlokasamnayanam 7

File name : shivastutishlokasaMnayanam7.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | shivastutishlokasaMnayanam 5 | vAvRittashlokAH ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

Shivastutishlokasamnayanam 7

# શિવસ્તુતિશ્લોકસંનયનમ્ ૭

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

દેવ્યુવાચ ।

દેવ દેવ મહાદેવ કરુણાવરુણાલય ।
વિશ્વવિશ્વાધિકાશાસ્ય ત્રિપુરાન્ધકસંહર ॥ ૨.૧॥

બ્રહ્મોવાચ ।

શમ્ભો ત્વં કનકાદ્રિચાપશરધિર્વાહીકૃતામ્નાયકઃ
પાહીશ ક્ષિતિસુન્દરોત્તમરથ શ્રીશોઽથ જિષ્ણુઃશરઃ ।
મૌર્વી ચોરગપુઙ્ગવસ્તવ વરે ચક્રે ચ કેન્દ્રત્તમે
લક્ષ્યં તે ત્રિપુરં સુરા ભટગણાઃ કસ્તે નમસ્તે સમઃ ॥ ૧૨.૧૦॥

વિષ્ણુરુવાચ ।

ગઙ્ગાચન્દ્રલલામધામ ભગવન્ હૈમાગબાણાસન
ભૂમા ત્વં ખસમીરવહ્નિજલભૂસૃષ્ટિસ્થિતિગ્રાસકઃ ।
શર્વ ત્વં હરિસાયકઃ ક્ષિતિરથો વાહીકૃતામ્નાયકઃ
સર્વેષાં ચ પુમર્થદોઽસિ કૃપયા માં પાહિ સામ્બ પ્રભો ॥ ૧૨.૨૮॥

હિમવાનુવાચ ।

હર હર મુરજિત્પ્રપૂજિતાઙ્ઘ્રે
વરકાકોદરહાર સોમચૂડ ।
ગરકણ્ઠાનલચારુનેત્ર શમ્ભો
સદયં મામવલોકયાશુ દીનામ્ ॥ ૧૪.૬૫॥

નારદ ઉવાચ ।

શમ્ભો ભર્ગ મહેશ્વરેશ્વર મહાદેવેશ વિશ્વાધિક
વિશ્વાશાસ્ય દયાનિધે શ્રુતિશતૈરુદ્ઘોષિતોઽન્નપ્રદઃ ।

તેનૈવાદ્ય સુતૃપ્તદીપ્તસુરતા ધન્યૈર્મુનીન્દ્રૈર્ગણૈ-
ર્નાન્યત્ર પ્રવિશામહે તવ કૃપાપૂર્ણાઃ પ્રમોદામહે ॥ ૧૯.૬૯॥

સ્કન્દ ઉવાચ ।

નમસ્તે રુદ્રાદ્યૈઃ પ્રતિપદનમોઽન્તૈર્મનુગણૈઃ
ઋષિ દેવધ્યાનપ્રતિમચન વાક્યાર્થમધુરૈઃ ।
નિરુક્તૈરુક્તોઽર્થઃ શ્રુતિશિરસિ બોધાય સુગમઃ
ઉપાયસ્તે જ્યાયાન્ અકથયદુમાયૈ સ ભગવાન્ ॥ ૨૭.૨૩॥

સુબ્રહ્મણ્ય ઉવાચ ।

કારુણ્યામૃતસારપૂરિતલસન્નેત્રાન્તસંવીક્ષણં
ત્રૈલોક્યાવનદીક્ષિતં જપવટીરાજત્કરામ્ભોરુહમ્ ।
સામ્બં નિર્જરદીર્ઘિકાપ્રવિલસત્સમ્ફુલ્લપદ્માવલી-
ધૂલીધૂસરકર્બુરોજ્જ્વલજટારેખં ભજે શઙ્કરમ્ ॥ ૩૪.૧૧૪॥

ત્વય્યાસક્તમનાસ્ત્વદેકશરણો વર્તે પુનસ્ત્વાં વિના
સ્વામિન્ પર્વતસાર્વભૌમતનયાજાને ન જાને પરમ્ ।
સ ત્વં ચેદિહ ન પ્રસીદસિ તતઃ કં પ્રાર્થયેઽહં પ્રભો ॥ ૩૪.૧૧૫॥

વન્દે સિન્દૂર વર્ણં સુરસરિદમૃતાંશૂલ્લસત્સત્કપર્દં
ભાલોદ્યન્નેત્રમીશં સ્મિતમુખકમલં દિવ્યભૂષાઙ્ગરાગમ્ ।
વ્યસ્તોરુન્યસ્તપાણિં તરુણકુવલયં સન્દધત્યા ઉમાયા
વૃત્તોત્તુઙ્ગસ્તનાગ્રે નિહિતકરતલં નીલકણ્ઠં મહેશમ્ ॥ ૩૪.૧૧૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનમ્ ૭ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । શિવસ્તુતિશ્લોકસંનયનમ્ ૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . shivastutishlokasaMnayanam 5 . vAvRRittashlokAH ..

Notes:

The Śloka-s શ્લોકાઃ eulogizing Śiva શિવ; that eventuate sporadically in various Adhyāya-s અધ્યાયાઃ of ŚivaRahasyam Amśa-12 શિવરહસ્યમ્ અંશઃ-૧૨, are collated on this page.

Proofread by Ruma Dewan

*Shivastutishlokasamnayanam 7*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*